# Dhanvantari Vandana

# धन्वन्तारिवन्दना

## Document Information

Text title : Dhanvantari Vandana

File name : dhanvantarivandanA.itx

Category : vishhnu, saptaka

Location : doc_vishhnu

Author : HarinArAyaNa Sharma Vaidya

Transliterated by : Deepakshi Kumar

Proofread by : Deepakshi Kumar

Latest update : August 12, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 12, 2021

*sanskritdocuments.org*

# धन्वन्तरिवन्दना

विशिष्टरोगौषध-बोधभावात्
    रोग-व्रजाभाव-विधान-वीरम् ।
न तत्र यान्तश्च कदापि मोहं
    धन्वन्तरिं वैद्यवरं नमामि ॥ १॥

पीयूषपाणिं कुशलं क्रियासु
    धीरं निरीहं शुभदं दयालुम् ।
प्रबुद्धसाङ्गागद-वेद-विद्यं
    धन्वन्तरिं वैद्यवरं नमामि ॥ २॥

स्वस्थेषु मैत्रीं करुणां रुजार्ते
    प्रीतिं सुसाध्ये विदधानमेव ।
उपेक्षणञ्चासु-मुमुक्षुमर्त्ये
    धन्वन्तरिं वैद्यवरं नमामि ॥ ३॥

इच्छन्तमग्र्यं परमं स्व-धर्मं
    दुःखात्प्रयत्नेन सदातुराणाम् ।
निजात्म-जानामिव रक्षितारं
    धन्वन्तरिं वैद्यवरं नमामि ॥ ४॥

भूतानुकम्पेति परो हि धर्मः
    निश्चित्य पथ्येन गदघ्नमस्मात् ।
सुसिद्धिमन्तं सुखिनम्प्रशान्तं
    धन्वन्तरिं वैद्यवरं नमामि ॥ ५॥

पुंसां गदानां विविधे निदाने
    लिङ्गे सुशान्तौ च भवाप्रवृत्तौ ।
चतुर्विधज्ञान-विशेषभाजं
    धन्वन्तरिं वैद्यवरं नमामि ॥ ६॥

देशस्य कालस्य तनोर्गदानां
द्रव्यस्य दोषस्य रसस्य चापि ।
अशेष-तत्त्वज्ञवरं प्रभावात्
धन्वन्तरिं वैद्यवरं नमामि ॥ ७॥

स्पर्शावगम्यैर्बहुभिस्तु भावैः
शरीर जातैर्गदपीडितानाम् ।
आयुः प्रमाणान्यवबुध्यमानं
धन्वन्तरिं वैद्यवरं नमामि ॥ ८॥

असाध्यवर्जं परियाप्य याप्यान्
साध्यामयान् सिद्धसुयोगसङ्घैः ।
निघ्नन्तमव्याहतबुद्धिवेगं
धन्वन्तरिं वैद्यवरं नमामि ॥ ९॥

इति हरिनारायणशर्मा वैद्य विरचिता धन्वन्तरिवन्दना समाप्ता ।

Encoded and proofread by Deepakshi Kumar

*Dhanvantari Vandana*
pdf was typeset on August 12, 2021

Please send corrections to *sanskrit@cheerful.com*